This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ श्रीमञ्जूषा प्रारंभः॥

श्री. वे. शा. सं. घाटेशास्त्री
। चेरणीसपुर नागपुर.

॥श्रीगणेशाय नमः॥ अथ किमिदं वाक्यं नाम एकतिङ् वाक्यमिति भाष्यात् एकतिङ्तार्थमुख्यविशेष्यकबोधजनकपदसमूहो वाक्यमि
ति वैयाकरणाः। तेन पचति भवती सा देवपचस्यमम्गोधावती सादेव क्रियापदस्यानेकत्वेपि नैक[illegible]वाक्यता व्याघातः। न हि क्रियाविनिर्मुक्तं वाक्यम
स्तीति भाष्यात् अस्ति भवन्तिपरः प्रथमपुरुषः इति [illegible] कात्यायनस्मरणाच्च सर्वत्र समुचितः क्रियापदाध्याहारः। न चास्तु क्रियापदाध्याहारः।
तथापि बोधविशेष्यत्वं प्रथमांतार्थस्यैवेति वाक्यं पचस्यमम्गोधावती सादावगतेः प्रथमांतार्थयोर्विशेष्यत्वे वाक्यभेदप्रसंगात् मृगस्य दर्शनक्रि
यायां कर्मतयाऽन्वये मृगपदोत्तरं द्वितीयापत्तेः द्वितीयायां च सत्त्वे लटः शतृशानचावप्रथमासमानाधिकरणे इत्यनुशासनात् लटः शत्रादे
शापातेन पश्यसे सेवं स्यात् तथा च पचस्यमम्गोधावतीति वाक्ये कोऽसौ रूपत्तेः तमि[illegible]स्याध्याहारे वाक्यभेदे दोषो दुर्वार एव। न च वाक्यभेदे क्षतिविरहः श्रुति
तथासति वाक्ये तिङ्ङतिङ इति सूत्रे अतिङ इत्यस्य व्यावर्त्य[illegible]भावेन वैयर्थ्यापत्तेः निघातस्वरस्य च एकवाक्यताधीनत्वात् एकवाक्यताभावे तदनुपपत्तेः
न च हरे ईक्षावतारा इत्यत्र का क्रियाऽध्याहार्या भवन्तीत्येवेति परंतु प्रयोग्यतानतत्र लडर्थवर्तमानत्वान्वयः। अविवक्षितत्वात् वर्तमा
नसामीप्ये लट् सामीप्यं च भूतभविष्यद्रूपं। अत एव जयंति कृष्णस्य इत्याद्यवताराः इति मुकुंदः। वारिदस्तत्र नेमाप्नोति सुखमक्षय्यम्
न हः इत्यादौ न लडर्थविवक्षितत्वमिति मिश्राः॥ वर्तमानार्थकलट्प्रत्ययांतत्वेन स्याल्लोकस्य तत्सामीप्यार्थकलट्प्रत्ययांतत्वेन तिङ्
(तिङ्ङतिङः। अतिङ् तास्वरं तिङ् तंनिहन्यते)

Acc. No. ~~2926~~ M-1919 Author - ? Subject - व्याकरण, न्याय
Title - सिद्धान्तरहस्य Date - ? folio - 4, Xerox - 4. Checked 2012

न. ४ सनम ३ १

टकोद्धारे मधुसूदनठक्कुराः अत्र नैयायिकाः निःक्रियस्यापि वाक्यस्य सत्त्वात् क्रियाविषयं वाक्यं तथा हि सुबंतसमूहः तिङंतसमूहः सुबंतति
ङंतसमूहश्चेति त्रयः कालाः पचति भवति चैत्रः पचति इत्यादि एकवाक्यता लेकमुख्यविशेष्यकबोधजनकत्वेन पचस्यमम्गोधाव
ती सा दावपि तस्याक्षतेः तथाहि धावनकर्तृकम[illegible] कर्मकदर्शनाश्रयस्त्वमित्यन्वयबोधात्। वाक्यस्यात्र कर्मतासंसर्गेण दृशिक्रिया
यां भानं वाक्यस्यार्थवत्त्वाभावेन प्रातिपदिकत्वात् द्वितीयाद्यापत्तिः। नैवं वाक्यभेदः किं चैवं न हि क्रियाविनिर्मुक्तं वाक्यमस्तीति भ न.५
गवतः पतंजलेः धरणीभारविघ्नं मण[illegible] भणति रेवं तथा हि त्रयः काला इत्यादि क्रियाविनिर्मुक्तवाक्यस्य सर्वजनीनत्वात्। न
हि त्रैकालिकक्रियाध्याहर्तुं शक्या। अपि च क्रियायाः विशेष्यत्वे प्रयाति पुरुषस्तस्य च रणाय भिवादये दिस्यादेतच्छेदेन पुरु
षस्य परामर्शो न स्यात् तस्य विशेषणत्वेनोपस्थितत्वात् अन्यथा दर्शे राजमातंगास्तिस्ये वामी तुरंगमा इत्यादेरपि सा
धुत्वापत्तेः इत्याधन[illegible]जंत्यतिस्म अत्रेदं भावयामः पचस्यमम्गोधावतीत्यत्र तादृशमृगस्य दर्शनक्रियायां कर्मतासंसर्गेणान्वयो न सं
३ भवति नामार्थधात्वर्थयोर्भेदेनातिरिक्तसंबंधेन साक्षादन्वयबोधस्याव्युत्पन्नत्वात्। अन्यथा तंदुलः पचती सादेरपि साधुतापत्तेः। न च तत्र मृग
स्य नामार्थत्वाभावान्नदोष इति वाच्यं॥

मा.न.६ ते

Scribe - त्र्यंबकुवैद्य.

KKSU LIBRARY RAMTEK 441 106 M-1919 Dist. Nagpur

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यप२

तथासति मृगपदोत्तरं प्रथमापि न स्यात् तस्या अपि प्रातिपदिकार्थप्रसंगात् किंच मृगकर्तृकोत्कटधावनस्य दृ
शिक्रियायां कर्मत्वेन विवक्षास्थले त्वयुक्तमेवारण्ये मृगो धावतीत्यस्यैकवाक्यत्वं भाष्यकृत्संमतं तत्त्वानुपपन्नमेव भाष्यकृ
संमतिस्तु हेलाराजेन स्पष्टीकृता। तथाहि सुबंतं हि यथानेकं सुबंतं तस्य विशेषणं तथा तिङंतमप्याहुस्तिङंतं तस्य विशेष
णमित्युक्तं तेन धावनक्रियायाः कर्मत्वविवक्षायां न प्रतीकारः इत्याशयः। अन्यथा धावंतं मृगं पश्य इत्येव ब्रूयात् तंडुलः
पचतीत्यादितोपि तंडुलकर्मकपाकबोधापत्तेः। किंच अपः कालो इत्यत्र शायितः तिङ्क्रियाध्याहारोस्तीति क्रियाविनिर्मुक्त
वाक्यस्योदाहरणस्यासंगत्यापत्तेः। किंच मृणु गर्जति मे [illegible] घः नटो गायति मृणु घटोऽनश्यत् सस्यैत्यादावपि अगते श्र्या
तेन प्रथमार्थकर्मत्वमित्यपास्तं किं चैवं मृगे संख्यान्वयो न स्यात् आख्यातोपस्थाप्यसंख्याप्रकारकोन्वयबोधं प्र
ति मुख्यविशेष्यतया प्रथमांतपदजन्योपस्थितेर्हेतुत्वात् अन्यथा हंसीवधवलाकीर्तिरित्यत्र हंस्यामपि संख्यान्व

२

०।२

यप्रसंगः मृगे संख्यानन्वये इष्टापत्तौ च पश्य धावंति मृगा इत्यादेरपि साधुत्वापत्तेः किंच पटोलपत्रं पित्तघ्नं नाडी तस्य
कफापहा चैत्रो ग्रामं गतस्तत्र मैत्रः किं कुरुते ऽधुना इत्यादिप्रयोगदर्शनात् तत्कर्तृकेन विशेषस्यापि परामर्शः परं तु पक्षाद्य
तावच्छेदकरूपविशेषणस्य न तु विशेष्यपरामर्शः तेन द्वैते राजमातंगा इत्याद्वैतेनकाप्यनुपपत्तिः अत एव उत्सर्गोयं न नि
यमः तदुक्तं सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वमि [illegible] तिरिक्तं ।। ५।। इति वैयाकरणमतं ।। ।। अथ नैयायिकमतमु
पदर्शयति ।। मृगपदोत्तरं प्रथमापि न स्यात् इति धावनक्रियाविशिष्टमृगस्य वाक्यार्थत्वेन नामार्थत्वाभावात् प्रातिपदिकार्थ
यीभूता प्रथमापि न स्यादित्यर्थः तत्रोऽतेऽरण्ये मृगो धावतीत्याख्यातोक्तसंख्याके कर्तरि नामार्थे प्रथमापश्चात् स्यैति क्रियांतरे ३
णाक्षार्थतयाऽन्वयेपि प्राथमिकी प्रातिपदिकसंज्ञा पाकर्तुमशक्येति को नाम प्रथमां निवारयितुं ह्यशक्तेति। यत्तु मृगकर्तृकोत्कटधा
वनस्यैव दृशिक्रियायां कर्मतयान्वयो विवक्षित इति भाष्यकृतां तात्पर्यवर्णनं तदपि सुबंतं हि यथानेकं सुबंतं तस्य विशेषणं तथा तिङ्
तमप्याहुस्तिङंतं तस्य विशेषणमिति। हेलाराजसंमतिप्रदर्शनं तदुभयमपि न विचारचारुप्रकृतिप्रसयोसहार्थंभूतस्तम्पोः प्रसंगा २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थप्राधान्यमितिनियमात्। धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रतिविशेष्यतया प्रत्ययजन्यो
पस्थितिर्हेतुरिति कार्यकारणभावादेकधात्वर्थप्रकारकापरधात्वर्थविशेष्यकान्वयबोध एव न संभवतीति। न च भावप्रधानमाख्यातं।
सत्वप्रधानानि नामानि इति यास्कमुनिविशेषवचसा आख्यातस्थले प्रत्ययार्थप्राधान्यं त्यज्यत इति वाच्यं। आख्यातपदं हि तिङ्त्वे च नि
रूढं न तु धातुघटितं। आख्यातार्थेषु संख्यावर्जमानत्वादिषु भावस्यैव संख्याकालातिरिक्ताख्यातार्थस्यैव प्राधान्यमिति तदर्थात्। वस्तुतस्तु
प्रथमान्तार्थप्राधान्ये विप्रगकर्तृकोत्कटधावनस्य कर्मतासंबंधेन हस्तिक्रियायां विशेषणतयाऽन्वयो न विरुध्यते यतो हि विशेष्यान्व
यिनान्वयित्वमत्र विशेषणत्वं धावनक्रियाया अक्षतमिति न भाष्यकृद्युक्तिविरोधो न वा हेलाराजोक्तविरोध इति न त्वं स्य एं चेदमीमांसायां लो
हितोष्णीषाः ऋत्विजः प्रचरंतीति लोहितोष्णीषाः ऋत्विजः प्रचरंतीत्यादौ तथा हि पूर्ववाक्ये उष्णीषविशिष्टऋत्विक्कर्तृकप्रचरणमिष्टसा
धनमिति बोधः तत्रोष्णीषाणामपि इष्टसाधनत्वे विशेषणतयाऽन्वयः तत्र विशेषणत्वं विशेष्यान्वयिनाऽन्वयित्वमेव उष्णीषा
णां विशेष्याः ऋत्विजः तदन्वयि इष्टसाधनत्वं तदन्वयित्वमुष्णीषाणामिति उत्तरवाक्ये तु पूर्ववाक्यलब्धस्योष्णीषविशिष्टऋत्विक्कर्तृ

(= प्रचरणकार =)

२ कप्रचरणस्येष्टसाधनत्वेऽन्वयः किंतु लौहित्यसमासस्य तत्रापि परंपरयोष्णीषप्रकारकऋत्विक्रूपविशेष्यान्वयिना
इष्टसाधनत्वेन लौहित्यान्वयस्वीकारादिति॥ यत्तु धावंतं मृगं पश्येत्येव ब्रूयादिति तत्पर्यायस्थाने प्रयोगे वक्तुरिच्छाया एव
नियामकत्वेनोपपत्तेः सर्वथा तात्पर्याभावे मृगपदं नोच्चारयेत्। किंतु पश्य धावतीत्येव ब्रूयादिति न काप्यनुपपत्तिरिति॥ यत्तु
त्रयः कालाः इत्यत्र ज्ञायंते इति क्रियान्वयसंभवात् क्रियाविनिर्मुक्तवाक्यस्योदाहरणस्यासंगतापत्तिरिति चेन्न। ज्ञानक्रिया
नाकांक्षयोः कति कालाः त्रयः कालाः इति प्रश्नोत्तरवाक्ययोः क्रियाविनिर्मुक्तत्वसंभवादिति॥ यत्तु शृणु गर्जति मेघः न ये
गायति शृणु घटोऽनश्यत् पश्येत्साकांक्षमप्युपगतेश्चेति तन्न सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति वि
शेष्ये बाधे इति न्यायात् विशेष्येषु मेघनष्टघटेषु श्रवणदर्शनयोर्बाधात् विशेषणेषु गर्जनगानाभावेषु श्रवणदर्शनान्व
यस्स्वज्यत इति॥ १ २

न

यत्तु अरुण गर्जति मेघ इत्यादौ अरुणे मेघकर्मकत्वाभावेन प्रथमार्थ एव कर्मत्वमित्यपास्तमिति तन्न सविशेषणेति न्यायेनारु
णे गर्जनविशिष्टमेघकर्मकत्वबाधेपि गर्जनकर्मत्वस्यान्वयसंभवात् कर्मत्वं प्रथमार्थ इति सम्यगेवोक्तमित्येतदर्थत्वे प्र
कारतयाभानं विशेषः वस्तुतः सुपि भक्तो न लक्षणेति नियमात् कर्मत्वेन प्रथमार्थो त्र भवति किं च साधुत्वमात्रार्थिका
याः शक्याभावाच्छक्यसंबंधरूपलक्षणापि न संभवत्येवेति तत्त्वे शं[illegible]खाः अपूपं ते भेयः अपूपं ते इति महाभाष्यकार
प्रयोगात् तन्निध्वानमस्त्रपतयो-चेजन्नाः इत्यभियुक्तप्रयोगाच्च सविशेषणे हीति न्यायस्य सर्वसम्मतत्वाच्चेति यत्तु
किं चैवं मृगे संख्यान्वयो न स्यात् आख्यातोपस्थाप्यसंख्याप्रकारकान्वयबोधं प्रति मुख्यविशेष्यतया प्रथमांतपदज
न्योपस्थितेर्हेतुत्वात् अन्यथा हंसीव धवला कीर्तिरित्यत्र हंस्यामपि संख्यान्वयप्रसंगः मृगे संख्यानन्वये इष्टा
पत्तौ अन्वयस्य धावति मृगा इत्यादेरपि साधुत्वापत्तेरिति तन्न एवं दर्शने धावनविशिष्टमृगस्य विशेषणतया ऽन्व
यस्वीकारस्यार्थः मुख्यविशेषणत्वाभावे सति विशेष्यत्वं मुख्यविशेष्यत्वं तेनेयर्थः

विशेष्यतया २

४ त्वं च न वक्तव्यं चैत्र एव पचतीत्यादौ व्यभिचारात् अन्ययोगव्यवच्छेदरूपैवकारार्थैकदेशे ऽन्वयत्वे चैत्रस्य विशेषणत्वे
न मुख्यविशेष्यतया प्रथमांतपदजन्योपस्थितिविषयत्वाभावात् चैत्रान्यो न पचति चैत्रः पचतीति तदर्थात् तथो
च चैत्र एव पचतीत्यत्र चैत्रे संख्यान्वयार्थं आख्यातोपस्थाप्यसंख्याप्रकारकान्वयबोधं प्रति विशेष्यतया प्र
थमांतपदजन्योपस्थितिर्हेतुरित्येव कार्यकारणभावो ऽङ्गीकर्तुमुचितः अन्यथा हंसीव संघटते कीर्तिः स्व
र्गंगा मृगा हतः साधुपमाने संख्यान्वयानंगीकारे स्वर्गंगावगाहना अपत्यस्याख्यातार्थस्य संख्याया असाधारणधर्मत्वानु
पपत्तेः हंस इव कृष्ण ते कीर्तिरित्यादीनामपि साधुतापत्तौ चालंकारिकमते वैरस्यापादकलिंगवचनभेदस्योपमानोपमेयनिष्ठस्य
दुष्टत्वं न स्यात् संख्याकालातिरिक्ताख्यातार्थो हि भावनाभावनान्वयिनि संख्यान्वय इति नियमात् । क्वचिद्विशेष्यस्य क्वचिद्विशेष
णस्य परामर्शो नासर्वविषयपरामर्शकत्वं तच्छब्दस्य नियतं परं तु पदार्थतावच्छेदकरूपविशेषणस्य क्वचिदपि न परामर्शः ।। ५ ।।
इति सिद्धांतरहस्यं समाप्तं ।। इदं पुस्तकं [illegible] लिखितं ।। ५ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५ ४

K K S U LIBRARY RAMTEK 441 106 M-1919 Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 12:26
,TRANSFERRED=2020/10/22 at 12:27:39
,PAGES=4
,TYPE=STD
,NAME=S0004374
,Book Name=M-1919-SIDHANTRAHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection